संगः सर्वात्मना त्याज्यः स चेत्त्यक्तुं न शक्यते ॥
स सद्भिः सह कर्तव्यः संतः संगस्य भेषजम् ॥२॥
अनुकूले कलत्रादौ विष्णोः कार्याणि कारयेत् ॥
उदासीने स्वयं कुर्यात् प्रतिकूले गृहं त्यजेत् ॥३॥
तत्त्यागे दूषणं नास्ति यतः कृष्णबहिर्मुखाः ॥
अनुकूलस्य संकल्पः प्रतिकूलविसर्जनम् ॥४॥
करिष्यत्यतिविश्वासो भर्तृत्वे वरणं यथा ॥
आत्मनैवेद्यकार्पण्ये षड्विधा शरणागतिः ॥५॥

इति श्रीमद्वल्लभाचार्यकृता पंचश्लोकी समाप्ता ।

## अथ न्यासादेशः ।

श्रीकृष्णाय नमः ।

न्यासादेशेषु धर्मत्यजनवचनतोऽकिंचनाधिक्रियोक्ता कार्पण्यं वांगमुक्तं, मदितरभजनापेक्षणं वा व्यपोढम् ॥ दुःसाध्येच्छोद्यमौ वा क्वचिदुपशमितावन्यसंमेलने वा ब्रह्मास्त्रन्याय उक्तस्तदिह न विहतो धर्म आज्ञादिसिद्धः ॥१॥

१ भगवत्कर्म. २ रक्षिष्य.

इति श्रीवल्लभाचार्यविरचितो न्यासादेशः समाप्तः ।